# brahmasUtraM

# બ્રહ્મસૂત્રમ્

## Document Information

Text title : brahmasUtram

File name : brahmasUtramVS.itx

Category : major_works, vAsudevAnanda-sarasvatI, vedanta, sUtra

Location : doc_z_misc_major_works

Author : vAsudevAnandasarasvatI TembesvAmi

Proofread by : Sunder Hattangadi

Description-comments : From stotrAdisangraha

Latest update : December 31, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# બ્રહ્મસૂત્રમ્

ચિત્તૂલજાતં યદુ ચિત્તવૃત્તં ત્રિવૃત્કૃતં યેન ચ ભૂતજાતમ્ ।
યત્પૂર્વજાતં યદુ નૈવ જાતં તદ્બ્રહ્મસૂત્રં દ્વિજ ધેહ્યજાતમ્ ॥ ૧॥

ત્રિલોકસૂત્રં ખલુ યત્સુમન્ત્રં ત્રિવૃત્તગાત્રં નવદેવમાત્રમ્ ।
યદ્વૈ ત્રિમાત્રં યદનન્તમાત્રં તદ્બ્રહ્મસૂત્રં દ્વિજ ધેહ્યજાતમ્ ॥ ૨॥

પ્રજાપતેર્યત્ખલુ પૂર્વજાતં યજ્ઞોપવીતં સહજાતમાક્તમ્ ।
સત્ત્વેન મુક્તં ત્રિગુણેન શક્તં તદ્બ્રહ્મસૂત્રં દ્વિજ ધેહ્યજાતમ્ ॥ ૩॥

દક્ષોદ્ધૃતં ચેદ્યદુ વિશ્વસૂત્રં સદા પવિત્રં પ્રકરોતિ સૂત્રમ્ ।
એનોલવિત્રં ભજતૈકપાત્રં તદ્બ્રહ્મસૂત્રં દ્વિજ ધેહ્યજાતમ્ ॥ ૪॥

યદ્બ્રહ્મસૂત્રં યદુ વસ્તુતન્ત્રં યતઃ સ્વતન્ત્રં પરતન્ત્રયન્ત્રમ્ ।
તમાહુરત્રેઃ પરમં સુપુત્રં તદ્બ્રહ્મસૂત્રં દ્વિજ ધેહ્યજાતમ્ ॥ ૫॥

યમત્રિપુત્રં બ્રુવતે પવિત્રમસાધ્વમિત્રં કિલ સાધુમિત્રમ્ ।
અતીવ ચિત્રં સુવિચિત્રગાત્રં તદ્બ્રહ્મસૂત્રં દ્વિજ ધેહ્યજાતમ્ ॥ ૬॥

અનન્યયા સૂત્રમિદં પવિત્રં ભક્ત્યા ધૃતં ચેત્સુવિશુદ્ધગાત્રમ્ ।
ભવેત્પવિત્રાત્સ પવિત્ર એવ તદ્બ્રહ્મસૂત્રં દ્વિજ ધેહ્યજાતમ્ ॥ ૭॥

સ બ્રાહ્મણો યો મનસા બિભર્તિ યદ્વા નરો યો વચસા બિભર્તિ ।
યદ્વાપ્યદમ્ભઃ શ્રવસા બિભર્તિ તદ્બ્રહ્મસૂત્રં દ્વિજ ધેહ્યજાતમ્ ॥ ૮॥

દ્વિજોઽપિ ચેદ્યેન વિવર્જિતઃ સ ચણ્ડાલ એવાસ્ય ચ ધારણેન ।
સદ્બ્રાહ્મણત્વં ખલુ હીનજાતેસ્તદ્બ્રહ્મસૂત્રં દ્વિજ ધેહ્યજાતમ્ ॥ ૯॥

નવસૂત્રમહોરાત્રં યોઽત્રિપુત્રમયં દ્વિજઃ ।
બ્રહ્મસૂત્રમિદં ધત્તે સ યાતીહ પવિત્રતામ્ ॥ ૧૦॥

ઇતિ શ્રી પરમપૂજનીય શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં
બ્રહ્મસૂત્રં સમ્પૂર્ણમ્ ॥

Proofread by Sunder Hattangadi

*brahmasUtraM*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*